'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 4th Semester Examination, 2022

## SEC1-P2-SANSKRIT

Time Allotted: 2 Hours                                                                 Full Marks: 60

*The figures in the margin indicate full marks.*

### UNIT-I

1. अधोलिखितयोरेकस्योत्तरं संस्कृतेन देवनागर्या च प्रदेयम् – 12×1 = 12

(क) पातञ्जलयोगदर्शनस्य समाधिपादे समाधेः किं लक्षणं प्रदत्तम् ? तस्य को विषयः ? तत्र के भेदाः सर्वमालोच्यताम्।

(ख) ''वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः''– इति सूत्रमिदं व्याख्येयम्।

2. द्वयोः सूत्रयोः संस्कृतेन देवनागर्या च व्याख्या कार्या – 6×2 = 12

(क) तत्र स्थितौ यत्नोऽभ्यासः।

(ख) क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः।

(ग) तस्य वाचकः प्रणवः।

3. संक्षिप्तमुत्तरं संस्कृतेन देवनागर्या च देयम् (द्वयोः) – 3×2 = 6

(क) योगदर्शनस्य कः प्रवक्ता ? तस्य कोऽन्यः परिचयः ?

(ख) किं नाम वैराग्यम् ?

(ग) योगदर्शने कानि प्रमाणानि स्वीकृतानि ?

### UNIT-II

4. संस्कृतेन देवनागर्या चोत्तरं देयम् (एकस्य) – 12×1 = 12

(क) ईशोपनिषद्दृष्ट्या ब्रह्मणः स्वरूपमालोच्यताम्।

(ख) ईशोपनिषदमनुसृत्य मुक्तेरुपायः संक्षेपेण वर्ण्यताम्।

5. संस्कृतेन देवनागर्या च व्याख्या कार्या (द्वयोः)– 6×2 = 12

(क) असूर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥

(ख) तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥

(ग) विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥

6. संस्कृतेन देवनागर्या च संक्षिप्तमुत्तरं देयम् (द्वयोः) – 3×2 = 6

(क) के आत्महनो जनाः ?

(ख) ''ईशोपनिषद्'' कस्मिन् वेदे दृश्यते ? अस्यामुपनिषदि कति मन्त्राः ?

(ग) के अन्धं तमः प्रविशन्ति ?

——×——